अथ प्रमेहज्ञानम् ।
प्रमेहे ग्रन्थिरूपा सा सुतप्ता तामदूषणे ॥*॥
विषविष्टम्भगुल्मज्ञानमाह ।
उत्पित्सुरूपा विषरिष्टिकायां
विष्टम्भगुल्मेन च वक्ररूपा ।
अत्यर्थवातेन अधः स्फुरन्ती
उत्तानभेदिन्यसमाप्तिकाले ॥*॥
गुल्मे विशेषमाह कश्चित् ।
गुल्मेन कम्पोऽथ पराक्रमेण
पारावतस्येव गतिं करोति ॥*॥
अथ भगन्दरज्ञानम् ।
व्रणार्थं कठिने देहे प्रयाति पैत्तिकं क्रमम् ।
भगन्दरानुरूपेण नाड़ीव्रणनिवेदने ।
प्रयाति वातिकं रूपं नाड़ी पावकरूपिणी ॥
अथ वान्तादिज्ञानम् ।
वान्तस्य शल्याभिहतस्य जन्तो-
र्वेगावरोधाकुलितस्य भूयः ।
गतिं विधत्ते धमनी गजेन्द्र-
मरालमानेव कफोल्बणेन ॥
स्त्रीरोगादिकमपि रक्तादिज्ञानक्रमेण ज्ञातव्यम् ।
क्वचित्प्रकरणोल्लेखात् क्वचिदौचित्यमात्रतः ।
क्वचिद्देशात् क्वचित् कालात् सङ्कीर्णगदनिर्णयः ॥
नाड़ीपरिचयज्ञानं प्रायशो नैव दृश्यते ।
तेन धाष्ट्यं मयोक्तं यत्तत् समाधेयमुत्तमैः ॥"
इति श्रीशङ्करसेनकविराजकृते नाड़ीप्रकाशे तृतीयोद्योतः ॥

नाड़ीकः, पुं, ( नाड़ीव कायतीति । कै+कः । ) शाकविशेषः । पाटशाक इति नालिताशाक इति च भाषा ॥ तत्पर्य्यायः । पट्टशाकः २ नाड़ीशाकः ३ । अस्य गुणाः । रक्तपित्तनाशित्वम् । विष्टम्भित्वम् । वातकोपनत्वञ्च । इति भावप्रकाशः ॥

नाड़ीकलापकः, पुं, ( नाड़ीनां नाड़ीवन्नालानां कलापः समूहो यत्र । कप् । ) सर्पाक्षी । इति भावप्रकाशः ॥

नाड़ीकेलः, पुं, ( नारिकेलः । पृषोदरादित्वात् साधुः । ) नारिकेलः । इति शब्दरत्नावली ॥

नाड़ीचः, पुं, ( नाड्या चीयते इति । चि+बाहुलकात् डः । ) शाकविशेषः । नालिता इति भाषा । तत्पर्य्यायः । केचुकम् २ पेचुली ३ पेचुः ४ विम्बरोचनः ५ । इति त्रिकाण्डशेषः ॥
"नाड़ीचशाकं द्विविधं तिक्तं मधुरमेव च ।
रक्तपित्तहरं तिक्तं क्रिमिकुष्ठविनाशनम् ।
मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृत् ॥"
इति राजवल्लभः ॥

नाड़ीचरणः, पुं, ( नाड़ीवच्चरणौ यस्य । ) पक्षी । इति त्रिकाण्डशेषः ॥

नाड़ीजङ्घः, पुं, ( नाड़ीवत् जङ्घा यस्य । ) काकः । इति त्रिकाण्डशेषः ॥ मुनिविशेषः । यथा ।
"नाड़ीजङ्घः सुरगुरुमुनिर्व्वक्ति दृष्टेरकालौ
मासावेतौ न शुभफलदौ पौषमाघौ न शेषान् ।"
इति मलमासतत्त्वम् ॥

बकविशेषः । यथा, महाभारते । १२ । १६६ । १६—२० ।
"ततोऽस्तं भास्करे याते सन्ध्याकाल उपस्थिते ।
आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः ॥
नाड़ीजङ्घ इति ख्यातो दयितो ब्रह्मणः
सखा ।
बकराजो महाप्राज्ञः काश्यपस्यात्मसम्भवः ॥"

नाड़ीतरङ्गः, पुं, ( नाड्यां नालायां तरङ्गो यत्र ।) काकोलः । हिण्डकः । रतहिण्डकः । इति मेदिनी । गे, ५६ ॥

नाड़ीतिक्तः, पुं, ( नाड्या तिक्तः । ) नेपालनिम्बः । इति राजनिर्घण्टः ॥ ( नेपालनिम्बशब्देऽस्य विशेषो ज्ञेयः ॥ )

नाड़ीदेहः, पुं, ( नाड़ीसारो देहो यस्य । कृशत्वात् तथात्वम् । ) भृङ्गी । इति त्रिकाण्डशेषः ॥

नाड़ीनक्षत्रं, क्ली, ( नाड़ीस्थितं नक्षत्रम् । ) नरस्य जन्मदशमषोड़शाष्टादशत्रयोविंशपञ्चविंशनक्षत्राणि । राज्ञः पूर्व्वोक्तानि जातिदेशाभिषेकनक्षत्राणि च । यथा,—
"जन्माद्यं कर्म्म ततोऽपि दशमं साङ्घातिकं
षोड़शभम् ।
समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
आद्यात्तु पञ्चविंशं मानसमेवं नरः षड्ऋक्षः
स्यात् ।
नवनक्षत्रो नृपतिः स्वजातिदेशाभिषेकर्क्षैः ॥"*॥
जातृक्षन्तु ।
"पूर्व्वात्रयं सानलमग्रजानां
राज्ञान्तु पौष्णेन सहोत्तराणि ।
सपौष्णमित्रं पितृदैवतञ्च
प्रजापतेर्भञ्च कृषीवलानाम् ॥
आदित्यहस्ताभिजिदश्विभानि
तान्यन्त्यजातेः प्रभविष्णुताथाम् ।
देशभं देशनामर्क्षम् । नाड़ीनक्षत्राणि ॥ * ॥
ईहा देहार्थहानिः स्याज्जन्मर्क्षे उपतापिते ।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे ॥
मूर्त्तिद्रविणबन्धूनां हानिः साङ्घातिके तथा ।
सन्तप्ते सामुदायिके मित्रभृत्यार्थसङ्क्षयः ।
वैनाशिके विनाशः स्याद्देहद्रविणसम्पदाम् ॥
नाड़ीनक्षत्रफलम् ॥ * ॥
जातिभे कुलनाशः स्याद्बन्धनञ्चाभिषेकभे ।
देशभे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम् ॥
यस्मिन् राजाभिषेको भवति तदाभिषेचनिकभम् । अ इ उ ए कृत्तिका । ओ व वि वु रोहिणीत्यादि देशभम् ।
सर्व्वेषां पीड़ायां दिनमेवमुपोषितोऽमलं जुहु-
यात् ।
सावित्र्या क्षीरतरोः समिद्भिरमरद्विजानुरतः ॥"
इति ज्योतिस्तत्त्वम् ॥

नाड़ीविग्रहः, पुं, ( नाड़ीसारो विग्रहो यस्य । अतिकृशत्वात् तथात्वम् । ) भृङ्गी । इति हेमचन्द्रः । २ । १२४ ॥

नाड़ीव्रणः, पुं, ( नाड़ीसंलग्नो व्रणः । ) सर्व्वदा-गलद्व्रणः । नाली घा इति भाषा । इत्यमरः । २ । ६ । ५४ ॥ तस्य निदानं यथा,—
"यः शोथमाममिति पक्वमुपेक्षतेऽज्ञो
यो वा व्रणं प्रचुरपूयमसाधुवृत्तः ।
अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य
स्थानानि पूर्व्वविहितानि ततः सपूयः ॥
तस्यातिमात्रगमनाद्गतिरिष्यते तु
नाड़ीव यद्वहति तेन मता तु नाड़ी ॥"*॥
वातादिदोषभेदेन तस्य रूपाणि यथा,—
"दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संमूर्च्छितैरपि च शल्यनिमित्ततोऽन्या ।
तत्रानिलात् परुषसूक्ष्ममुखी सशूला
फेनानुविद्धमधिकं स्रवति क्षपासु ॥
पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकमुष्णमहःसु चापि ।
ज्ञेया कफाद्बहुघनार्ज्जुनपिच्छिलास्रा
स्तब्धा सकण्डुररुजा रजनीप्रवृद्धा ॥
दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि ।
तामादिशेत् पवनपित्तकफप्रकोपात्
घोरामसुक्षयकरीमिव कालरात्रिम् ॥
दोषद्वयाभिहतलक्षणदर्शनेन
तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात् ॥"
शल्यनिमित्तलक्षणं यथा,—
"नष्टं कथञ्चिदनुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति ।
सा फेनिलं मथितमच्छमसृग्विमिश्र-
मुष्णं करोति सहसा सरुजञ्च नित्यम् ॥"
असाध्यकृच्छ्रसाध्ययोर्लक्षणं यथा,—
"नाड़ी त्रिदोषप्रभवा न सिध्येत्
शेषाश्चतस्रः खलु यत्नसाध्याः ॥"
इति माधवकरः ॥ * ॥
"विडङ्गत्रिफला कृष्णाचूर्णं लीढं समाक्षिकम् ।
हन्ति कुष्ठं कृमीन्मेहनाड़ीव्रणभगन्दरान् ॥"
इति गरुड़पुराणम् ॥
(अस्य चिकित्सान्तरं यथा,—
"नाड़ीनां गतिमन्विष्य शस्त्रेणापाट्य कर्म्मवित् ।
सर्व्वव्रणक्रमं कुर्य्यात् शोधनं रोपणादिकम् ॥
नाड़ीं वातकृतां साधु पाटितां लेपयेद्भिषक् ।
प्रत्यक्पुष्पीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत् ॥
पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशायुगैः ।
श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः ॥
शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम् ।
आरग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुता ।
सूत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशनी ॥
घोण्टाफलत्वङ्मदनात् फलानि
पूगस्य च त्वक् लवणञ्च मुख्यम् ।
स्नुह्यर्कदुग्धेन सहैष कल्को
वर्त्तीकृतो हन्त्यचिरेण नाड़ीम् ॥
वर्त्तीकृतं माक्षिकसंप्रयुक्तं
नाड़ीघ्नमुक्तं लवणोत्तमं वा ।